श्री कनकधारा स्तोत्रम्

Shri Kanakadhara Stotram

Source: Sanskrit Wikisource — Kanakadhara Stotram, revision 399053 (CC BY-SA 4.0). Also compared: Creative Commons Attribution-ShareAlike 4.0 licence; Internet Archive — Kanakadhara Stotram 1941, PDF pages 5-22 (public-domain-marked visual comparison).

VERSE 1

अङ्गं हरेः पुलकभूषणमाश्रयन्ती
भृङ्गाङ्गनेव मुकुलाभरणं तमालम्।
अङ्गीकृताखिलविभूतिरपाङ्गलीला
माङ्गल्यदाऽस्तु मम मङ्गलदेवतायाः॥१॥

Aṅgaṃ Hareḥ Pulakabhūṣaṇamāśrayantī
Bhṛṅgāṅganeva Mukulābharaṇaṃ Tamālam |
Aṅgīkṛtākhilavibhūtirapāṅgalīlā
Māṅgalyadā'stu Mama Maṅgaladevatāyāḥ ||1||

VERSE 2

मुग्धा मुहुर्विदधती वदने मुरारेः
प्रेमत्रपाप्रणिहितानि गतागतानि।
माला दृशोर्मधुकरीव महोत्पले या
सा मे श्रियं दिशतु सागरसम्भवायाः॥२॥

Mugdhā Muhurvidadhatī Vadane Murāreḥ
Prematrapāpraṇihitāni Gatāgatāni |
Mālā Dṛśormadhukarīva Mahotpale Yā
Sā Me Śriyaṃ Diśatu Sāgarasambhavāyāḥ ||2||

VERSE 3

आमीलिताक्षमधिगम्य मुदा मुकुन्दम्
आनन्दकन्दमनिमेषमनङ्गतन्त्रम्।
आकेकरस्थितकनीनिकपक्ष्मनेत्रं
भूत्यै भवेन्मम भुजङ्गशयाङ्गनायाः॥३॥

Āmīlitākṣamadhigamya Mudā Mukundam
Ānandakandamanimeṣamanaṅgatantram |
Ākekarasthitakanīnikapakṣmanetraṃ
Bhūtyai Bhavenmama Bhujaṅgaśayāṅganāyāḥ ||3||

VERSE 4

बाह्वन्तरे मधुजितः श्रितकौस्तुभे या
हारावलीव हरिनीलमयी विभाति।
कामप्रदा भगवतोऽपि कटाक्षमाला
कल्याणमावहतु मे कमलालयायाः॥४॥

Bāhvantare Madhujitaḥ Śritakaustubhe Yā
Hārāvalīva Harinīlamayī Vibhāti |
Kāmapradā Bhagavato'pi Kaṭākṣamālā
Kalyāṇamāvahatu Me Kamalālayāyāḥ ||4||

VERSE 5

कालाम्बुदालिललितोरसि कैटभारेर्
धाराधरे स्फुरति या तटिदङ्गनेव।
मातुः समस्तजगतां महनीयमूर्तिर्
भद्राणि मे दिशतु भार्गवनन्दनायाः॥५॥

Kālāmbudālilalitorasi Kaiṭabhārer
Dhārādhare Sphurati Yā Taṭidaṅganeva |
Mātuḥ Samastajagatāṃ Mahanīyamūrtir
Bhadrāṇi Me Diśatu Bhārgavanandanāyāḥ ||5||

VERSE 6

प्राप्तं पदं प्रथमतः खलु यत्प्रभावान्
माङ्गल्यभाजि मधुमाथिनि मन्मथेन।
मय्यापतेत्तदिह मन्थरमीक्षणार्धं
मन्दालसं च मकरालयकन्यकायाः॥६॥

Prāptaṃ Padaṃ Prathamataḥ Khalu Yatprabhāvān
Māṅgalyabhāji Madhumāthini Manmathena |
Mayyāpatettadiha Mantharamīkṣaṇārdhaṃ
Mandālasaṃ Ca Makarālayakanyakāyāḥ ||6||

VERSE 7

विश्वामरेन्द्रपदविभ्रमदानदक्षम्
आनन्दहेतुरधिकं मुरविद्विषोऽपि।
ईषन्निषीदतु मयि क्षणमीक्षणार्धम्
इन्दीवरोदरसहोदरमिन्दिरायाः॥७॥

Viśvāmarendrapadavibhramadānadakṣam
Ānandaheturadhikaṃ Muravidviṣo'pi |
Īṣanniṣīdatu Mayi Kṣaṇamīkṣaṇārdham
Indīvarodarasahodaramindirāyāḥ ||7||

VERSE 8

इष्टाविशिष्टमतयोऽपि यया दयार्द्र-
दृष्ट्या त्रिविष्टपपदं सुलभं लभन्ते।
दृष्टिः प्रहृष्टकमलोदरदीप्तिरिष्टां
पुष्टिं कृषीष्ट मम पुष्करविष्टरायाः॥८॥

Iṣṭāviśiṣṭamatayo'pi Yayā Dayārdra-
Dṛṣṭyā Triviṣṭapapadaṃ Sulabhaṃ Labhante |
Dṛṣṭiḥ Prahṛṣṭakamalodaradīptiriṣṭāṃ
Puṣṭiṃ Kṛṣīṣṭa Mama Puṣkaraviṣṭarāyāḥ ||8||

VERSE 9

दद्याद्दयानुपवनो द्रविणाम्बुधाराम्
अस्मिन्नकिञ्चनविहङ्गशिशौ विषण्णे।
दुष्कर्मधर्ममपनीय चिराय दूरं
नारायणप्रणयिनीनयनाम्बुवाहः॥९॥

Dadyāddayānupavano Draviṇāmbudhārām
Asminnakiñcanavihaṅgaśiśau Viṣaṇṇe |
Duṣkarmadharmamapanīya Cirāya Dūraṃ
Nārāyaṇapraṇayinīnayanāmbuvāhaḥ ||9||

VERSE 10

गीर्देवतेति गरुडध्वजसुन्दरीति
शाकम्भरीति शशिशेखरवल्लभेति।
सृष्टिस्थितिप्रलयकेलिषु संस्थितायै
तस्यै नमस्त्रिभुवनैकगुरोस्तरुण्यै॥१०॥

Gīrdevateti Garuḍadhvajasundarīti
Śākambharīti Śaśiśekharavallabheti |
Sṛṣṭisthitipralayakeliṣu Saṃsthitāyai
Tasyai Namastribhuvanaikagurostaruṇyai ||10||

VERSE 11

श्रुत्यै नमोऽस्तु शुभकर्मफलप्रसूत्यै
रत्यै नमोऽस्तु रमणीयगुणार्णवायै।
शक्त्यै नमोऽस्तु शतपत्रनिकेतनायै
पुष्ट्यै नमोऽस्तु पुरुषोत्तमवल्लभायै॥११॥

Śrutyai Namo'stu Śubhakarmaphalaprasūtyai
Ratyai Namo'stu Ramaṇīyaguṇārṇavāyai |
Śaktyai Namo'stu Śatapatraniketanāyai
Puṣṭyai Namo'stu Puruṣottamavallabhāyai ||11||

VERSE 12

नमोऽस्तु नालीकनिभाननायै
नमोऽस्तु दुग्धोदधिजन्मभूत्यै।
नमोऽस्तु सोमामृतसोदरायै
नमोऽस्तु नारायणवल्लभायै॥१२॥

Namo'stu Nālīkanibhānanāyai
Namo'stu Dugdhodadhijanmabhūtyai |
Namo'stu Somāmṛtasodarāyai
Namo'stu Nārāyaṇavallabhāyai ||12||

VERSE 13

नमोऽस्तु हेमाम्बुजपीठिकायै
नमोऽस्तु भूमण्डलनायिकायै।
नमोऽस्तु देवादिदयापरायै
नमोऽस्तु शार्ङ्गायुधवल्लभायै॥१३॥

Namo'stu Hemāmbujapīṭhikāyai
Namo'stu Bhūmaṇḍalanāyikāyai |
Namo'stu Devādidayāparāyai
Namo'stu Śārṅgāyudhavallabhāyai ||13||

VERSE 14

नमोऽस्तु देव्यै भृगुनन्दनायै
नमोऽस्तु विष्णोरुरसि स्थितायै।
नमोऽस्तु लक्ष्म्यै कमलालयायै
नमोऽस्तु दामोदरवल्लभायै॥१४॥

Namo'stu Devyai Bhṛgunandanāyai
Namo'stu Viṣṇorurasi Sthitāyai |
Namo'stu Lakṣmyai Kamalālayāyai
Namo'stu Dāmodaravallabhāyai ||14||

VERSE 15

नमोऽस्तु कान्त्यै कमलेक्षणायै
नमोऽस्तु भूत्यै भुवनप्रसूत्यै।
नमोऽस्तु देवादिभिरर्चितायै
नमोऽस्तु नन्दात्मजवल्लभायै॥१५॥

Namo'stu Kāntyai Kamalekṣaṇāyai
Namo'stu Bhūtyai Bhuvanaprasūtyai |
Namo'stu Devādibhirarcitāyai
Namo'stu Nandātmajavallabhāyai ||15||

VERSE 16

सम्पत्करा‍णि सकलेन्द्रियनन्दनानि
साम्राज्यदानविभवानि सरोरुहाक्षि।
त्वद्वन्दनानि दुरितोद्धरणोद्यतानि
मामेव मातरनिशं कलयन्तु मान्ये॥१६॥

Sampatkarāṇi Sakalendriyanandanāni
Sāmrājyadānavibhavāni Saroruhākṣi |
Tvadvandanāni Duritoddharaṇodyatāni
Māmeva Mātaraniśaṃ Kalayantu Mānye ||16||

VERSE 17

यत्कटाक्षसमुपासनाविधिः
सेवकस्य सकलार्थसम्पदः।
सन्तनोति वचनाङ्गमानसैस्त्वां
मुरारिहृदयेश्वरीं भजे॥१७॥

Yatkaṭākṣasamupāsanāvidhiḥ
Sevakasya Sakalārthasampadaḥ |
Santanoti Vacanāṅgamānasais Tvāṃ
Murārihṛdayeśvarīṃ Bhaje ||17||

VERSE 18

सरसिजनिलये सरोजहस्ते
धवलतमांशुकगन्धमाल्यशोभे।
भगवति हरिवल्लभे मनोज्ञे
त्रिभुवनभूतिकरि प्रसीद मह्यम्॥१८॥

Sarasijanilaye Sarojahaste
Dhavalatamāṃśukagandhamālyaśobhe |
Bhagavati Harivallabhe Manojñe
Tribhuvanabhūtikari Prasīda Mahyam ||18||

VERSE 19

दिग्घस्तिभिः कनककुम्भमुखावसृष्ट-
स्वर्वाहिनीविमलचारुजलप्लुताङ्गीम्।
प्रातर्नमामि जगतां जननीमशेष-
लोकाधिनाथगृहिणीममृताब्धिपुत्रीम्॥१९॥

Digghastibhiḥ Kanakakumbhamukhāvasṛṣṭa-
Svarvāhinīvimalacārujalaplutāṅgīm |
Prātarnamāmi Jagatāṃ Jananīmaśeṣa-
Lokādhināthagṛhiṇīmamṛtābdhiputrīm ||19||

VERSE 20

कमले कमलाक्षवल्लभे त्वं
करुणापूरतरङ्गितैरपाङ्गैः।
अवलोकय मामकिञ्चनानां
प्रथमं पात्रमकृत्रिमं दयायाः॥२०॥

Kamale Kamalākṣavallabhe Tvaṃ
Karuṇāpūrataraṅgitairapāṅgaiḥ |
Avalokaya Māmakiñcanānāṃ
Prathamaṃ Pātramakṛtrimaṃ Dayāyāḥ ||20||

VERSE 21

देवि प्रसीद जगदीश्वरि लोकमातः
कल्याणगात्रि कमलेक्षणजीवनाथे।
दारिद्र्यभीतिहृदयं शरणागतं माम्
आलोकय प्रतिदिनं सदयैरपाङ्गैः॥२१॥

Devi Prasīda Jagadīśvari Lokamātaḥ
Kalyāṇagātri Kamalekṣaṇajīvanāthe |
Dāridryabhītihṛdayaṃ Śaraṇāgataṃ Mām
Ālokaya Pratidinaṃ Sadayairapāṅgaiḥ ||21||

VERSE 22

स्तुवन्ति ये स्तुतिभिरमूभिरन्वहं
त्रयीमयीं त्रिभुवनमातरं रमाम्।
गुणाधिका गुरुतरभाग्यभागिनो
भवन्ति ते भुवि बुधभावितायाः॥२२॥

Stuvanti Ye Stutibhiramūbhiranvahaṃ
Trayīmayīṃ Tribhuvanamātaraṃ Ramām |
Guṇādhikā Gurutarabhāgyabhāgino
Bhavanti Te Bhuvi Budhabhāvitāśayāḥ ||22||